**अप्रयुत** त्रि० प्र+यु—मिश्रणे अमिश्रणे च क्त न०त०। १अपृथग्भूततया युते २पृथग्भूततया युते च।

**अप्रयुत्वन्** त्रि० प्र+यु—पृथग्भावे ङ्वनिप् न०त०। अपृथग्भूते “पर्त्तृभिष्टिमदब्धैरप्रयुत्वभिः” ऋ० ६,४८,१०, “अप्रयुत्वभिरपृथग्भूतैः” भा०।

**अप्रलम्ब** न० प्र+लम्ब—घञ् अभावे न०त०। १ विलम्बाभावे शीघ्रे २तद्वति त्रि० हलायुधः।

**अप्रवर्त्तिन्** त्रि० न प्रवर्त्तितुं शीलमस्य ताच्छील्ये इनि। १प्रवृत्तिशीलशून्ये २सन्तते ३विच्छेदरहिते स्त्रियां ङीप् ४अनुच्छित्तौ “नैतदस्मिन् संवदिष्टाः अप्रवर्त्तीति” छा०उ०। “अयं वाव स योऽयमन्तर्हृदयाकाशस्तदेतत् पूर्णमप्रवर्त्ति अप्रवर्त्तिनीं श्रियं लभते य एवं वेद” इति छा० उ०। ‘अप्रवर्त्ति अनुच्छित्तिधर्म्मकमिति” भा०।

**अप्रवीत** त्रि० प्र+वी—प्रजननादिषु क्त न०त० १अजाते। गर्भधारणेन गतसारभिन्नायां २ अकामितायां च स्त्रियां स्त्री। “दक्षिणेन द्वारं सोमक्रयणी तिष्ठत्यलज्जिता व्यङ्गाऽप्रवीतेति” कात्या०७,६, १४, ‘अप्रवीता वी गतिजननकान्त्यादिषु अत्र प्रजननार्थः प्रशब्दात् वाक्यशेषाच्च प्रजाता हि गतसारा भवति नोपभोगमात्रेण। तस्मादप्रवीताऽप्रजातेति हरिस्वामी। अकामितेति कर्कभा० ४अयातयामायां स्त्रियाम् “सा स्यादप्रवीता वाग्वा एषा निदानेन यत् सहस्री अजातयाम्नी वा इयं वागयातयाम्नी अप्रवीता, तस्मादप्रवीता स्यादिति” शत०ब्रा० ५अनुपगते त्रि० “यदप्रवीता दधते ह गर्भम्” ऋ० ४,७,६, “अप्रवीता अनुपगता” भा०। [निवृत्ते।

**अप्रवृत्त** त्रि० न प्रवृत्तः विरोधे न०त०। प्रवृत्तिभिन्ने

**अप्रवेद** त्रि० नास्ति प्रवेदः लाभोयस्य। १ दुर्लभे। “अत्रस्त्व अप्रवेदे इति माह कस्माच्च न तस्त्व प्रत्नासीर्मीत इदं पुष्टं कश्चन प्रविदतेत्यवैतदाह” शत०ब्रा० “नास्ति प्रवेदः प्रलाभः ययोः दुर्लभे” इति भा०।

**अप्रशस्त** त्रि० न प्रशस्तम् विरोधे न०त०। १प्रशस्तभिन्ने अपकृष्टे २दुष्टे “अप्रशस्तञ्च कृत्वाप्सु मासमासीत भैक्षभुक्” मनुः। ३निन्दिते च “अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनादिति” परा०। ४क्षीणे “पान्ति मित्रावरुणाववद्याच्चयत ईमर्य्यमोअप्रशस्तान्” ऋ० १,१६७,८, “अप्रशस्तान् क्षीणान्” भा०। यावत्पदार्थस्य यत्र उचितत्वम् ततोन्यूनत्वे अस्य प्रवृत्तिः।

**अप्रसक्त** त्रि० न प्रसक्तः अभिनिवेशयुक्तः संबद्धो वा। १अभिनिवेशशून्ये, आग्रहरहिते २प्रसङ्गरहिते च अप्रसक्तनिषेधानुपपत्तेरिति मीमांसा। ३असंबद्धे।

**अप्रसक्ति** स्त्री अभावे न०त०। प्रसङ्गाभावे न०ब०। प्रसङ्गशून्ये त्रि० प्रसक्तिराग्रहः शास्त्रिश्च।

**अप्रसङ्ग** पु० अभावे न०त०। १सम्बन्धाभावे। न०ब०। २सम्बन्धशून्ये त्रि०। प्रसङ्गः उत्तराभिधाने सङ्गतिभेदः अभावे न०त०। ३सङ्गत्यभावे। न०ब०। ४तच्छून्ये त्रि० “अप्रसङ्गाभिधाने च श्रोतुः श्रद्धा न जायते” वृद्धाः।

**अप्रसन्न** त्रि० न०त०। १प्रसादशून्ये २अस्वच्छे ३चित्तप्रसादशून्ये ४स्फूर्त्तिहीने ५असन्तुष्टे च।

**अप्रसाद्य** त्रि० न प्रसादयितुं योग्यम्। १ प्रसादयितुमयोग्ये तीव्रकोपयुते।

**अप्रसाह** पु० न प्रसह्यतेऽभिभूयते प्र+सह—कर्म्मणि घञ्। १अनिष्टादिना अनभिभूयमाने “पश्चादग्नेः संविशति चर्मणि स्थण्डिले वा वाचंयमोऽप्रसाहः” छा०उ०। “न प्रसह्यते नाभिभूयते स्त्र्याद्यनिष्टस्वप्नदर्शनेन” भा०।

**अप्रसिद्ध** त्रि० न०त०। १अनिष्पन्ने २अविख्याते च “अप्यप्रसिद्धं यशसे हि पुंसामिति” कुमा०।

**अप्रसृत** त्रि० न प्रसृतः। १ विस्तारशून्ये प्रसरशून्ये।

**अप्रस्तुत** त्रि० न प्रस्तुतः। १ अनिष्पन्ने २कार्य्यसाधनायानुद्युक्ते ३ अप्रक्रान्ते ४ असंस्तुते च।

**अप्रस्तुतप्रशंसा** स्त्री सा०द०उक्ते अर्थालङ्कारभेदे तल्लक्षणादि “क्वचिद्विशेषः सामान्यात्१, सामान्यं वा विशेषतः२॥ कार्य्यान्निमित्तं३ कार्य्यञ्च ४हेतोरथ समात् समम्५॥ अप्रस्तुतात् प्रस्तुतञ्चेद्गम्यते पञ्चधा ततः। अप्रस्तुतप्रशंसा स्यात्”। “पादाहतं यदुत्थाय मूर्द्धानमधिरोहति। स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः”॥ अत्रास्मदपेक्षया रजोऽपि वरमिति विशेषे प्रस्तुते सामान्यमभिहितम्। “स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम्?॥ विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया”॥ अत्रेश्वरेच्छया क्वचिदहितकारिणोऽपि हितकारित्वं, हितकारिणोऽप्यहितकारित्वमिति सामान्ये प्रस्तुते विशेषोऽभिहितः। एवञ्चात्राप्रस्तुतप्रशंसामूलोऽर्थान्तरन्यासः। दृष्टान्ते प्रसिद्धमेव वस्तु प्रतिबिम्बत्वेनोपादीयते। इह तु विषामृतयोरमृतविषीभावस्याप्रसिद्धेर्न तस्य सद्भावः॥ “इन्दुर्लिप्त इवाञ्जनेन, जडिता दृष्टिर्मृगीणामिव, प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा। कार्कश्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं सीतायाः पुरतश्च हन्त शिखिनां वर्हाः सगर्हा इव